## षोडशः पाठः

# मेधाकौशलम्

महाकवेः भवभूतेः ''उत्तररामचरितम्'' इति नाट्यग्रन्थात् उद्धृतोऽयमंशः संस्कृतभाषायाः नाट्यपरम्परायाः परिचयार्थं कुशलवयोः मेधाकौशलं गुरोः शिष्यान् प्रति समदर्शिता ज्ञापनार्थं चात्र प्रस्तूयते।

(ततः प्रविशत्यध्वगवेषा तापसी)

**तापसी** – अये, वनदेवता फलकुसुमगर्भेण पल्लवार्घ्येण दूरान्मामुपतिष्ठते।

(प्रविश्य)

**वनदेवता** – (अर्घ्यं विकीर्य)

यथेच्छाभोग्यं वो वनमिदमयं मे सुदिवसः
सतां सद्भिः सङ्गः कथमपि हि पुण्येन भवति।
तरुच्छाया तोयं यदपि तपसां योग्यमशनं
फलं वा मूलं वा तदपि न पराधीनमिह वः॥

**तापसी** – किमत्रोच्यते ?

प्रियप्राया वृत्तिर्विनयमधुरो वाचि नियमः
प्रकृत्या कल्याणी मतिरनवगीतः परिचयः।
पुरो वा पश्चाद् वा तदिदमविपर्यासितरसं
रहस्यं साधूनामनुपधि विशुद्धं विजयते॥

(उपविशतः)

**वनदेवता** – कां पुनरत्रभवतीमवगच्छामि ?

**तापसी** – आत्रेय्यस्मि।

**वनदेवता** – आर्ये आत्रेयि! कुतः पुनरिहागम्यते ? किं प्रयोजनो दण्डकारण्योपवनप्रचारः ?

**आत्रेयी** –
अस्मिन्नगस्त्यप्रमुखाः प्रदेशे भूयांस उद्गीथविदो वसन्ति।
तेभ्योऽधिगन्तुं निगमान्तविद्यां वाल्मीकिपार्श्वादिह पर्यटामि॥

**वनदेवता** – यदा तावदन्येऽपि मुनयस्तमेव हि पुराणब्रह्मवादिनम् प्राचेतसमृषिम् ब्रह्मपारायणायोपासते, तत्कोऽयमार्यायाः प्रवासः ?

**आत्रेयी** – तस्मिन् हि महानध्ययनप्रत्यूह इत्येष दीर्घप्रवासोऽङ्गीकृतः।

**वनदेवता** – कीदृशः ?

**आत्रेयी** – तत्र भगवतः केनापि देवताविशेषेण सर्वप्रकाराद्भुतं स्तन्यत्यागमात्रके वयसि वर्तमानं दारकद्वयमुपनीतम्। तत्खलु न केवलं तस्य, अपितु तिरश्चामप्यन्तः करणानि तत्त्वान्युपस्नेह्यति।

**वनदेवता** – तयैव किल देवतया तयो: कुशलवाविति नाम्नी प्रभावश्चाख्यात:।

**वनदेवता** – कीदृश: प्रभाव: ?

**आत्रेयी** – तयो: किल सरहस्यानि जृम्भकास्त्राणि जन्मसिद्धानीति।

**वनदेवता** – अहो नु भोश्चित्रमेतत्।

**आत्रेयी** – तौ च भगवता वाल्मीकिना धात्रीकर्मत: परिगृह्य पोषितौ रक्षितौ च, निर्वृत्तचौलकर्मणोस्तयोस्त्रयी–वर्जमितरास्तिस्रो विद्या: सावधानेन परिनिष्ठापिता:। तदनन्तरं भगवतैकादशे वर्षे क्षात्रेण कल्पेनोपनीय त्रयीविद्यामध्यापितौ न त्वेताभ्यामतिदीप्तिप्रज्ञाभ्यामस्मदादे: सहाध्ययनयोगोऽस्ति यत: –

**वितरति गुरु: प्राज्ञे विद्यां यथैव तथा जडे**
**न तु खलु तयोर्ज्ञाने शक्तिं करोत्यपहन्ति वा।**
**भवति हि पुनर्भूयान् भेद: फलम् प्रति, तद्यथा**
**प्रभवति शुचिबिम्बग्राहे मणिर्न मृदादय:॥**

**वनदेवता** – अयमध्ययनप्रत्यूह: ?

**आत्रेयी** – अन्यश्च।

**वनदेवता** – अथापर: क: ?

**आत्रेयी** – अथ स ब्रह्मर्षिरेकदा माध्यन्दिनसवनाय नदीं तमसामनुप्रपन्न:। तत्र युग्मचारिणो: क्रौञ्चयोरेकं व्याधेन वध्यमानं ददर्श। आकस्मिकप्रत्यवभासां देवीं वाचमानुष्टुभेन छन्दसा परिणतामभ्युदैरयत् –

**मा निषाद! प्रतिष्ठां त्वमगम: शाश्वती: समा:।**

**वनदेवता** – चित्रम् ? अम्नायादन्यत्र नूतनश्छन्दसामवतार:।

**आत्रेयी** – तेन हि पुन: समयेन तं भगवन्तमाविर्भूतशब्दप्रकाशमृषिमुपसङ्गम्य भगवान् भूतभावन: पद्मयोनिरवोचत्–ऋषे! प्रबुद्धोऽसि वागात्मनि ब्रह्मणि। तद्ब्रूहि रामचरितम्। अव्याहतज्योतिरार्षं ते चक्षु: प्रतिभातु। आद्य: कविरसि इत्युक्त्वान्तर्हित:। अथ स भगवान् प्राचेतस: प्रथमम् मनुष्येषु शब्दब्रह्मणस्तादृशं विवर्तमितिहासं रामायणं प्रणिनाय।

**वनदेवता** – हन्त! पण्डित: संसार:।

**आत्रेयी** – तस्मादेव हि ब्रवीमि 'तत्र महानध्ययनप्रत्यूह' इति।

**वनदेवता** – युज्यते।

**आत्रेयी** – विश्रान्तास्मि भद्रे! संप्रत्यगस्त्याश्रमस्य पन्थानं ब्रूहि।

**वनदेवता** – इत: पञ्चवटीमनुप्रविश्य गम्यतामनेन गोदावरी तीरेण।

(इति निष्क्रान्त:)

## शब्दार्थः

| | | |
|---|---|---|
| अध्वगवेषा | – | पथिक वेश वाली |
| पल्लवार्घ्येण | – | पत्र रुपी अर्घ्य से |
| यथेच्छाभोग्यम् | – | स्वेच्छा से उपभोग करने योग्य |
| तोयम् | – | जल |
| विनयमधुरः | – | विनय के कारण हृदयाकर्षक |
| अनवगीतः | – | अनिन्दित |
| प्रियप्रायावृत्तिः | – | अतिशय प्रियकारी व्यवहार |
| अनुपधि | – | छल कपट से रहित |
| अविपर्यासितरसम् | – | न बदलने वाला प्रेम भाव |
| भूयांस उद्‌गीथविदः | – | बहुतेरे ब्रह्मवेत्ता |
| निगमान्तविद्याम् | – | वेदान्त विद्या को |
| अधिगन्तुम् | – | जानने के लिए |
| अध्ययनप्रत्यूहः | – | पढ़ने में विघ्न बाधा |
| दारकद्वयमुपनीतम् | – | जुड़वा (दो) बच्चे लाकर दिए। |
| जृम्भकास्त्राणि | – | जृम्भक नामक अस्त्र |
| धात्रीकर्मतः | – | धाई के वास्तविक स्वरूप को |
| निर्वृत्तचौलकर्मणोः | – | चूड़ाकर्म संस्कार हो जाने पर |
| भोश्चित्रमेतत् | – | अरे यह आश्चर्य है। |
| प्राज्ञे | – | बुद्धिमान् शिष्य को |
| जडे | – | बुद्धिहीन शिष्य को |
| शुचिबिम्बग्राहे | – | प्रतिबिम्ब के ग्रहण में |
| प्रत्यूहः | – | विघ्न/बाधा |
| आकस्मिकप्रत्यवभासाम् | – | एकाएक प्रकाशमयी को |
| अभ्युदैरयत् | – | उच्चारित किया |
| समाः | – | वर्षों तक, अनन्त काल तक |
| त्वम् मा अगमः | – | तुम नहीं प्राप्त करो |
| प्राचेतसः | – | वाल्मीकि ने |
| विवर्तमितिहासम् | – | रूपान्तरित इतिहास को |
| प्रणिनाय | – | निर्माण किया |
| महानध्ययनप्रत्यूह | – | अध्ययन में बड़ी बाधा |

## अभ्यासः

### ( 1 ) एकपदेन उत्तरं लिखत –

(क) सद्भिः सङ्गः केन भवति ?

(ख) दण्डकारण्यप्रदेशे के प्रमुखाः वसन्ति?

(ग) देवताविशेषेण अद्भुतं किम् उपनीतम् ?

(घ) दारकौ केन पोषितौ रक्षितौ च ?

(ङ) तयोः कानि जन्मसिद्धानि ?

### ( 2 ) एकवाक्येन उत्तरं लिखत –

(क) आत्रेयी दण्डकारण्ये किमर्थं भ्रमति स्म?

(ख) वाल्मीकिना का विद्या ताभ्याम् अध्यापिता ?

(ग) गुरुः विद्यां कथं वितरति ?

(घ) ब्रह्मर्षिः किमर्थं तमसामनुप्रपन्नः ?

(ङ) क्रौञ्चयोः एकं कः हतवान् ?

### ( 3 ) अधोलिखितप्रश्नानाम् उत्तराणि लिखत –

(क) वनदेवता वनस्य सौन्दर्यविषये तापसीं किं वदति ?

(ख) पद्मयोनिः वाल्मीकिं किमवोचत् ?

(ग) साधूनां चरितं कीदृशमस्ति ?

(घ) क्रौञ्चवधानन्तरं वाल्मीकिमुखात् का वाणी निर्गता ?

### ( 4 ) यथायोग्यं योजयत –

| | ( अ ) | ( आ ) |
|---|---|---|
| (क) | व्याधः | कुशलवौ |
| (ख) | तापसी | जृम्भकास्त्राणि |
| (ग) | वाल्मीकिपोषितौ | क्रौञ्चं हतवान् |
| (घ) | जन्मसिद्धानि | रामायणम् |
| (ङ) | वाल्मीकिः | आत्रेयी |

**(5) शुद्धवाक्यानां समक्षम् ''आम्'' अशुद्धवाक्यानां समक्षं ''न'' इति लिखत –**

**उदाहरणम् –**

| | | |
|---|---|---|
| | **तापसी अध्वगवेषा अस्ति।** | **आम्** |
| | **व्याधः क्रौञ्चं न हतवान्।** | **न** |
| (क) | गुरुः यथा प्राज्ञे तथैव जडे विद्यां वितरति। | |
| (ख) | जृम्भकास्त्राणि जन्मसिद्धानि आसन्। | |
| (ग) | लवकुशौ त्रयी विद्यां न अधीतवन्तौ। | |
| (घ) | वाल्मीकिः आदिकविः अस्ति। | |
| (ङ) | वाल्मीकिः रामायणं न लिखितवान्। | |

**(6) उचितैः पदैः रिक्तस्थानानि पूरयत –**

(निगमान्तविद्याम्, पुण्येन, प्रतिष्ठाम्, विशुद्धम्, माध्यन्दिनसवनाय)

(क) सतां सद्भिः सङ्गः . . . . . . . . . . . . . . भवति।

(ख) आत्रेयी . . . . . . . . . . . . . . अध्येतुम् पर्यटति।

(ग) महर्षिः . . . . . . . . . . . . . . तमसामनुप्रपन्नः।

(घ) मा! निषाद . . . . . . . . . . . . . . त्वमगमः शाश्वतीः समाः।

(ङ) रहस्यं साधूनामनुपधि . . . . . . . . . . . . . . विजयते।

**(7) सन्धिविच्छेदं कृत्वा सन्धेः नाम लिखत –**

**उदाहरणम् –**

**केनापि — केन + अपि = दीर्घस्वरसन्धिः।**

(क) अथापरः -------- + -------- = -------- ।

(ख) यथेच्छा -------- + -------- = -------- ।

(ग) यथैव -------- + -------- = -------- ।

(घ) आत्रेय्यस्मि -------- + -------- = -------- ।

(ङ) अन्येऽपि -------- + -------- = -------- ।

## (8) अव्ययैः वाक्यनिर्माणं कुरुत –

उदाहरणं यथा –

तत्र महर्षिः वाल्मीकिः वसति स्म।

(क) अपि

(ख) यदा

(ग) किल

(घ) खलु

(ङ) एकदा

## (9) क्रियापदानां धातुं लकारं पुरुषं वचनं च लिखत –

| | क्रियापदम् | धातुः | लकारः | पुरुषः | वचनम् |
|---|---|---|---|---|---|
| यथा | भवति | भू | लट्लकारः | प्रथमपुरुषः | एकवचनम् |
| (क) | ब्रवीमि | | | | |
| (ख) | प्रविशति | | | | |
| (ग) | पर्यटामि | | | | |
| (घ) | वसन्ति | | | | |
| (ङ) | अस्ति | | | | |

## (10) उदाहरणानुसारं पदानाम् मूलशब्दं विभक्तिं वचनञ्च लिखत –

| पदम् | मूलशब्दः | विभक्तिः | वचनम् |
|---|---|---|---|
| **वाल्मीकिना** | **वाल्मीकि** | **तृतीया** | **एकवचनम्** |
| विद्याम् | – – – – – – – | – – – – – – – | – – – – – – – |
| पुष्पेण | – – – – – – – | – – – – – – – | – – – – – – – |
| प्रकृत्या | – – – – – – – | – – – – – – – | – – – – – – – |
| पुण्येन | – – – – – – – | – – – – – – – | – – – – – – – |
| सताम् | – – – – – – – | – – – – – – – | – – – – – – – |
| प्रदेशे | – – – – – – – | – – – – – – – | – – – – – – – |

## योग्यताविस्तारः –

- भवभूतेः नाटकानां नामानि लिखत –

❖ ❖ ❖